This Question Paper consists of 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवं 4 मुद्रित पृष्ठाः सन्ति।

**Code No. 59/S/O**
गूढसंख्या

Roll No.
अनुक्रमाङ्कः

**Set / स्तवकः A**

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246)

Day and Date of Examination ..............................................................................
(परीक्षादिवसः दिनाङ्कश्च)

Signature of Invigilators 1. ..............................................................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ..............................................................................

*सामान्या निर्देशाः*—

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# SANSKRIT VYAKARAN

## संस्कृतव्याकरणम्

## (246)

परीक्षासमयावधिः (Time) : होरात्रयम् (3 hrs) ] [ पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः**— (i) अस्मिन् प्रश्नपत्रे [A] भागे 10, [B] भागे 10, [C] भागे 10, [D] भागे 5 इति आहत्य 35 प्रश्नाः सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **सर्वे** प्रश्नाः अनिवार्याः।

**[A]** दशानां युक्तं विकल्पं चिनुत— 1×10=10

1. अयं वर्णः अन्तस्थः अस्ति

   (क) च (ख) य

   (ग) द (घ) ह

2. अयं वर्णः गुणसंज्ञकः अस्ति

   (क) आ (ख) इ

   (ग) अ (घ) ऐ

3. एकाल्प्रत्ययस्य का संज्ञा भवति?

   (क) पदसंज्ञा (ख) गुणसंज्ञा

   (ग) धातुसंज्ञा (घ) अपृक्तसंज्ञा

4. आद् गुणः इति सूत्रस्यापवादसूत्रम् अस्ति

   (क) वृद्धिरेचि (ख) एङः पदान्तादति

   (ग) इको यणचि (घ) एत्येधत्यूठ्सु

5. ष्टुना ष्टुः इत्यस्य निषेधसूत्रम् अस्ति

   (क) तोः षि (ख) शात्

   (ग) नाज्झलौ (घ) अनचि च

6. ङ्याप्प्रातिपदिकात् इति सूत्रम् अस्ति

(क) विधिसूत्रम् (ख) अधिकारसूत्रम्

(ग) नियमसूत्रम् (घ) अतिदेशसूत्रम्

7. सर्वादयः शब्दाः सन्ति

(क) एकविंशतिः (ख) विंशतिः

(ग) अष्टादश (घ) पञ्चत्रिंशत्

8. यचि भम् इति सूत्रम् अस्ति

(क) विधिसूत्रम् (ख) अधिकारसूत्रम्

(ग) संज्ञासूत्रम् (घ) अतिदेशसूत्रम्

9. अभिहिते अपादाने का विभक्तिः भवति?

(क) प्रथमा (ख) तृतीया

(ग) पञ्चमी (घ) द्वितीया

10. अधिकरणं भवति

(क) त्रिविधम् (ख) द्विविधम्

(ग) पञ्चविधम् (घ) सप्तविधम्

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत— 2×10=20

11. संयोगसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत। 1+1

12. षष्ठी स्थानेयोगा इति परिभाषायाः अर्थं विलिख्य एकं प्रवृत्तिस्थलं प्रदर्शयत। 1+1

13. हशि च इति सूत्रस्य अर्थं विलिख्य उदाहरणं लिखन्तु। 1+1

14. सर्वस्मै इत्यत्र स्मै इति आदेशविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत। 1+1

15. दीर्घाज्जसि च इति सूत्रस्य अर्थं विलिख्य तस्य उदाहरणं ददातु। 1+1

16. गोपः गां पयः दोग्धि इत्यत्र गोः कर्मसंज्ञाविधायकं सूत्रं विलिख्य, तस्मात् द्वितीयाविधायकं सूत्रं लिखत। 1+1

17. शिवाय बिल्वपत्रं रोचते इत्यत्र शिवस्य सम्प्रदानसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत। 1+1

18. येनाङ्गविकारः इति सूत्रस्य अर्थम् उदाहरणं च वर्णयन्तु। 1+1

19. शुष्कः इत्यत्र तकारस्य कविधायकं सूत्रं विलिख्य तस्य अर्थं विलिखन्तु। 1+1

20. सत्संज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखन्तु। 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त— 4×10=40

21. ङिच्च इति सूत्रस्य व्याख्यां लिखत **अथवा** सूत्रं किं भवति इति प्रतिपादयत।

22. मिदचोऽन्त्यात्परः, आद्यन्तौ टकितौ इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु।

23. अनेकाल्शित्सर्वस्य, अलोऽन्त्यस्य इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु।

24. कृष्णैकत्वम्, देवैश्वर्यम् इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु।

25. ओसि च, सुपि च इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु।

26. सर्वस्मात्, सर्वस्मिन् इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु।

27. माता पुत्रं विद्यालयं गमयति, गुरुः शिष्यं वेदं वेदयति इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं लिखन्तु।

28. बालकः वृक्षं फलानि अवचिनोति, गुरुः शिष्यं वेदं पाठयति इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं वर्णयन्तु।

29. अचो यत्, ऋहलोर्ण्यत् इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु।

30. भिन्नः, गोदः इत्यनयोः प्रयोगयोः कस्यचिदेकस्य ससूत्रं सिद्धिं लिखन्तु।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः — 6×5=30

31. इको गुणवृद्धी, मुखनासिकावचनोऽनुनासिकः इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुर्वन्तु।

32. वृद्धिरेचि, आद् गुणः इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुरुत।

33. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च इत्यनयोः सूत्रयोः कस्यचिदेकस्य व्याख्यां कुरुत।

34. सर्वादीनि सर्वनामानि, जसः शी इत्यनयोरेकं सूत्रं व्याख्यात।

35. भीत्रार्थानां भयहेतुः, ध्रुवमपायेऽपादानम् इत्यनयोरेकं सूत्रं व्याख्यात।

★ ★ ★